https://www.amitrakshar.co.in/journal : www.amitrakshar.co.in
Volume – 2 | Issue – IV | Jul-Aug 2025 | ISSN: 3049-0278 (Online)
Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

# संस्कृतालंकारिकतत्त्वानुसारतः उज्ज्वलनीलमणौ भक्तिरसविमर्शनम्

श्रीश्रीराधाकृष्णाभ्यां नमः

**प्रभाकरसाहा [1], *ड. साधनकुमारपात्रः [2]**

## उपोद्घातः

भक्तिरससाधनायाः बहूनि निदर्शनानि दृक्पथमायान्ति आ वैदिककालाद् । भक्तिरससाधनानि मन्त्रे-ब्राह्मणे-उपनिषदे-निरुक्तादिषु तथा च पाणिनेरष्टाध्याय्यामपि अस्माभिः परिलक्ष्यन्ते। ऋग्वेदस्य बहूषु सुक्तेषु भक्तिशब्दस्य प्रयोगः समाम्नातः। सा भक्तिः भिन्नतया वैष्णवीयालंकारग्रन्थेषु विशेषतः उज्ज्वलनीलमणौ श्रीलरूपगोस्वामीपादेन प्रकटीकृता। यद्यपि वेदोपनिषत्सु कर्मज्ञानकाण्डाभ्यां सह उपासनाकाण्डस्यापि अस्तित्वं सर्वसम्मतम् । तथापि मनुष्यजनानां हृदये वृत्तित्रयेन चित्तप्रशान्तिः न प्राप्यते। वैदिककर्मानुष्ठानेन समाजस्य वित्तशालिनः जनाः निःश्रेयसः लभ्यन्ते स्म। एवम्प्रकारेण ज्ञानस्य दुर्गममार्गस्य अनुसरणं निम्नस्तरीयाणां शिक्षितानां नर-नारीणां पक्षतः असम्भवम्। भक्तेः प्राणमयप्रवाहस्य सञ्जीवन्याः धारायाः स्पर्शनैव तेषां सर्वग्राहीन्या मानसिक्याः शुष्कतायाः च अवसादान्निगमनं सम्भाव्यते। अस्यामाध्यात्मिकसंकटावस्थायां दाक्षिणात्यवासिन आलवारसम्प्रदायस्योद्भवः च तामिलभाषायां भक्तिसाधनायाः धारा तैः पुनः प्रवर्त्यते। अस्या साधनायाः समर्थकः अभिरामवराचार्यः नाम आलवारसम्प्रदायगतः एकः साधकः 'द्रविडोपनिषद् तात्पर्य' नामके ग्रन्थे उक्तवान्-

"शब्दस्य संस्कृततया यदि गौरवं स्याद्
वौद्धादिशास्त्रवचसामपि तत्प्रसङ्गः।
वाच्येन चेत् कथितमुत्तमवाच्यमेषु
भाषानिकर्ष इह तेन न शाक्यशङ्कः।।"[1]

पद्मपुराणस्य एकस्मिन् सुप्रसिद्धे श्लोके भक्तिसाधनाया उत्सः द्रविडदेशे संघटितः, तदुत्सतः अस्मिन् भारते दूरुहस्थले च अन्तिमप्रान्ते प्रवाहितम्। तत्तु स्पष्टरूपेण कीर्तितम्-

"उत्पन्ना द्रविडे भक्तिर्वृद्धिं कर्णाटके गता।
क्वचित् क्वचिन्महाराष्ट्रे गुर्जरे प्रलयं गता।।"[2]

औपनिषदीयब्रह्मवादस्य श्रेष्ठः धुरन्धरः अद्वैतवादी शङ्कराचार्येनापि व्यवहारिकलोकयात्रायां भक्तिरसं स्वीकृतवान् । आनन्दलहर्यारसंख्यकानि स्तोत्रान्येव तद्विषये अभ्रान्तानि प्रमाणानि ।

AIJITR - Volume - 2, Issue - IV, Jul-Aug 2025
Copyright © 2025 by author (s) and (AIJITR). This is an Open Access article distributed under the terms of the Creative Commons Attribution License (CC BY 4.0) (https://creativecommons.org/licenses/by/4.0)

[1] *गवेषकः, संस्कृतविभागः, वाँकुडाविश्वविद्यालयः*, psdeep326@gmail.com
[2] *अध्यापकः, सोनामुखीमहाविद्यालयः*
*DOI Link (Crossref) Prefix:* https://doi.org/10.63431/AIJITR/2.IV.2025.107-120

*AIJITR, Volume 2, Issue –IV, July - August, 2025, PP. 107-120*
*Received on 30th July 2025 & Accepted on 22nd, August, 2025 Published: 30th August, 2025.*

[1] गौडीय वैष्णव-सम्प्रदाय भक्तिरस ओ अलंकार-शास्त्र, विष्णुपद भट्टाचार्य, पृ-१२
[2] तत्रैव

तथा चाह-

“तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः
पयःपारावारः परिवहित सारस्वत इव।
दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत्
कवीनां प्रौढ़ानामजनि कमनीयः करयिता।।”[3]

एवम्प्रकारेण न्यायवैशेषिकसम्प्रदायगतैः आचार्यै अपि ईश्वरभक्ति-कृष्णभक्ति-शिवभक्तयः भक्तिसाधनायाः बहुमार्गेभ्यः स्वेषां पृथगयितुं नालम्। महानैयायिकेन उदयनाचार्येन भाषापरिच्छेदकारेण विश्वनाथपञ्चाननप्रभृतिभिः दार्शनिकैः माङ्गलाचरणात्मके श्लोके भक्तेः प्रगाढ़तत्त्वं अभिव्यक्तम्।

**गौड़प्रदेशे भक्तिभावनायाः क्रमविकाशः -**

गौड़देशे ख्रीः १५ शतके १६ शतके वा महाप्रभोः श्रीचैतन्यदेवस्य आविर्भावकालमुपलक्ष्य यदा भक्तेः अभिनवप्लावनं अप्लावयन्, तदा तस्य प्रभावः वृहत्तरबङ्गीयधर्मे च साहित्ये च समाजेऽपि शाश्वतरूपेण मुद्रितमभवत्। महाप्रभोरलौकिकचरित्रमबलम्व्य प्रकाण्डरूपेण पदावलीसाहित्यमपि समुत्थितम्। तस्य लोकत्तरजीवने भगवद्भक्तेः मूर्त्तत्वं यत् प्रकाशितम्, तत्तु तस्य भक्तगणानां जीवनेऽपि सञ्चारितम्। ते तु बुबुधुः – भक्तिरिव मनुष्यजीवनस्य चरमपरमार्थः। भक्त्या सह वृत्यान्तरस्य तुलनं असारं , लघुफल्गुश्चेति। वृन्दावनस्य षट्गोस्वामिकृद्भिः ग्रन्थसम्भार एव महाप्रभो उद्यमतायाः पूर्णफलम्। साहित्यतत्त्वे च रसतत्त्वविषये तैः याः निबन्धाः निबन्धिताः, तेषु श्रीरूपगोस्वामिना ‘भक्तिरसामृतसिन्धुः’, ‘उज्ज्वलनीलमणिः’, ‘नाटकचन्द्रिका’, च कविकर्णपुरेण ‘अलंकारकौस्तभेति’ केचन ग्रन्थाः सर्वापेक्षया प्रामाणिकरूपेण प्रकीर्तिताः। शाश्वतः प्राचीनालंकारशास्त्रेभ्यः प्रसिद्धप्रस्थानव्यतिरेकेभ्यः गौडीयवैष्णवसम्प्रदायानां साहित्यं तथा रसविषयकं समीक्षणम् एकमभिनवमार्गमबलम्व्य स्वातन्त्र्येण स्वान् प्रस्थाप्यते। चैतन्यदेवस्याविर्भावेन तस्य समसामयिके युगे चोत्तरकाले यद् सुविशालं संस्कृतसाहित्यम् उद्भावितम्, तत्तु वङ्गीयसारस्वतसाधनायाः एकं गौरवोज्ज्वलं निदर्शनम्। विशेषतः विद्यापतेः च चण्डीदासस्य पदावली, लीलाशुकविल्वमङ्गलस्य मधुररसस्रावी “कृष्णकर्णामृतम्” काव्यम्, जयदेवस्य ललित-कोमल-कान्त-पदावली “गीतगोविन्दम्”, रायरामानन्दस्य “जगन्नाथवल्लभम्” नाटकादिनां ग्रन्थानां निरन्तरं श्रवणमननास्वादनैः तैः खलु तेषां हृदयेषु सहजातं भक्तिभावं अङ्कुर्वन्ति पल्लवयन्ति च।

श्रीचैतन्यदेवस्य आविर्भावात् पूर्वं पूर्ववङ्गे कृष्णभक्तेः स्रोतः भगीरथखातावच्छिन्नजलप्रवाहन्यायेन निगूढतया वङ्गवासीनां मानसचित्रपटमभिसिञ्चितम्। श्रीधरदासस्य “सदुक्तिकर्णामृतम्” विद्याकरस्य “सुभाषितरत्नकोशः” च श्रीरूपगोस्वामिना “पद्यावलीति” नामके कोशकाव्ये संगृहीतः श्लोकसम्भार एव तस्य प्रामाण्यम् आवहति। तद्रूपं मध्ययुगीयवङ्गस्य स्थापत्यानां भास्कर्यानां च वहुनिदर्शनानि अपि भक्तिरसस्य अभ्रान्तं साक्ष्यमावहन्ति।

**प्राचीनालङ्कारिकानां विरुद्धमतानि-**

वैष्णवाचार्यानाम् अलङ्कारशास्त्राणि यद्यपि भरत-भामह-दण्डी-वामन-आनन्दवर्धन-अभिनवगुप्त-मम्मट-विश्वनाथादीनाम् आलंकारिकानां सिद्धान्तसमूहान् असम्पूर्णरूपेण न स्वीक्रियन्ते। तथापि उभयोः प्रस्थानयोर्मध्ये केचन मौलिकाः प्रभेदाः वर्तन्ते। केचन अलंकारान्, केचन गुनान्, अपरा रीतिः, कोऽपि रसध्वनिं, कोऽपि वक्रोक्तिं मूलीभूततत्त्वरूपेण काव्ये प्रतिपाद्यते। एवम्प्रकारेण अलंकारशास्त्रानां प्रस्थानानि आरभन्ते। चिरन्तनालंकारिकगणाः काव्यं लक्ष्यरूपेण आमनन्ति। प्रचलिताः लोकवृत्तयः, लौकिकानां मिथुनजनानां विचित्रानुभूतिः, उत्तम-मध्यम-नीचपात्रादीनां सुख-दुःखादीनां, ईर्ष्या-क्रोधादीनाञ्च प्रभृतीः विषयानाश्रित्य महाकाव्यं-खण्डकाव्यं-कथा-आख्यायिका-चम्पू-नाटकप्रभृतयः दृश्यश्रव्याणि काव्यानि रचितानि। प्रसङ्गेऽस्मिन् नाट्यशास्त्रस्य प्रथमाध्याये नाट्योत्पत्तौ भरतमुनिना प्रोक्तम्-

“नैकान्ततोऽत्र भवतां देवानां चापि भावनम्
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्त्तनम्।।

[3] तत्रैव, पृ-१३


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ ✉ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

Volume – 2 | Issue – IV | Jul-Aug 2025 | ISSN: 3049-0278 (Online)
Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

क्वचिद् धर्मः क्वचित् क्रीड़ा क्वचिदर्थः कृचिच्छमः।
क्वचिद्धास्यं क्वचिद् युद्धं क्वचित् कामः क्वचिद् वधः।।
नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्।।"[4]

प्राचीनालङ्कारिकैः काव्यं लक्ष्यरूपेण स्वीकृत्य स्वस्ववैलक्षणैर्दृष्टिभङ्ग्यानुसारतः लक्षणमपि प्रणितम्। यतोहि लक्ष्यानुसारेण लक्षणं निर्णीतम्- "लक्ष्यानुसारेण हि लक्षणव्यवस्था" इति विचारपद्धतिः सर्वसम्मतम्। अतः वैष्णवाचार्यैः कीदृशं काव्यनाटकलक्षणञ्च विहितम्, तत्तु अस्माभिः वोधनीयाः।

**<u>भक्तिरसविमर्शने केचन पूर्वपक्षानां मतखण्डनम्-</u>**

ननु यद्यपि भगवद्विषये मधुररसव्याख्यानम् अनुचितम्। तर्हि कथं वैपरीत्यं लक्ष्यते? कवेः कवित्वप्रतिभया भगवद्विषयं रतिर्व्याख्यानम् सर्वदोषशून्यम्। कवित्वप्रतिभया काव्यनाटकञ्च शोभते। तदर्थं कविजयदेवः तस्य गीतगोविन्दे राधामाधवयोः विलासकेलिवर्णनायां औचित्यस्य सीमा उल्लङ्घयन् औद्धयतेन निगद्यते। पण्डितराजजगन्नास्य तैक्ष्ण्यवचनेनापि तस्य परिचयं सुस्पष्टम् जातम् इत्यादीना कियदंशेन-

"तत्र रत्यादीनां भयातिरिक्तस्थायिभावानां सर्वत्र समत्वेऽपि रतेः सम्भोगरूपाया मनुष्येष्विवोत्तमदेवतासु स्फुटीकृत सकलानुभाववर्णनमनुचितम्।....न च। साधारणीकरणादाराध्यत्वज्ञानानुत्पत्तिरिति वाच्यम्। यत्र सहृदयानां रसोद्बोधः प्रमाणसिद्धस्तत्रैव साधारणीकरणस्य कल्पनात्। अन्यथा स्वमातृविषयक-स्वपित्रादिरतिवर्णनेऽपि सहृदयस्य रसोद्बोधापत्तेः। जयदेवादिभिस्तु गीतगोविन्दादिप्रवन्धेषु सकलसहृदय-सम्मततोयं समयो मदोन्मत्त मतङ्गजैरिव भिन्न इति न तन्निदर्शनेनेदानीम्तनेन तथा वर्णयितुं साम्प्रतम्।"[5]

प्रसङ्गेस्मिन् स्मरनीयं यत्- इतोपूर्वं ध्वनिकारेण वर्धनाचार्येण महाकवेः कालिदासस्य कुमारसम्भवमिति महाकाव्ये जगतः पार्वतीपरमेश्वरयोः शृङ्गारकेलिवर्णनायां रचनाशैल्या सहृदयसम्मतौचित्तमतिक्रमनमभवत्। ध्वन्यालोकस्य तृतीयोद्द्योते वृत्तिग्रन्थे उद्धृतम्-

"अव्युत्पत्तिकृतो दोषः शक्त्या समव्रियते कवेः।
यस्त्वशक्तिकृतस्तस्य स झटित्यवभासते।।"[6]

अस्य परिकरश्लोकस्य व्याख्यायां वर्धनाचार्येण याः कथिताः, ताश्च जगन्नाथोक्तवचनस्य प्रतिध्वनिमात्रम्- "तथाहि-महाकवीनामप्युत्तमदेवताविषय-प्रसिद्ध-सम्भोगशृङ्गारनिवन्धाद्यनौचित्यं शक्तितिरस्कृतत्वाद्ग्राम्यत्वेन न प्रतिभासते। यथा कुमारसम्भवे देवीसम्भोगवर्णनम्।...तस्मादभिनेयार्थेऽनभिनेयार्थे वा काव्ये यदुत्तमप्रकृते रादादेरुत्तमप्रकृतिभिर्नायिकाभिः सह ग्राम्यसम्भोगवर्णनं तत् पित्रोः सम्भोगवर्णनमिव सुतरामसभ्यम्। तथैवोत्तम- देवतादिविषयम्। यत्त्वेवंविधे विषये महाकवीनामप्यसमीक्ष्यकारिता लक्ष्ये दृश्यते स दोष एव। स तु शक्तितिरस्कृतत्वात् तेषां न लक्ष्यते- इत्युक्तमेव"।[7]

यथा गौडीयवैष्णवदार्शनिकैः तेषां शास्त्रे राधाकृष्णयोः लोकत्तरानुरागान् रतिर्भावैव सर्वश्रेष्ठः प्रकाशः – एवम्विधतया स्वीक्रियते, तथैव कृष्णविषयकं रतिमपि भक्तिभावमित्यनुक्त्वा मधुरभक्तिरसस्य विवर्तनमात्रमित्युक्त्वा परिगण्यते वैष्णवगणैः। यद्यपि भक्तिः प्राचीनाचार्यैः पारिभाषिकरससंज्ञया अनभिहिताः, तथापि देवादिविषयकं रतिं यथायोग्यं स्थानम् आनन्दवर्धनाभिनवगुप्तपादादिभिः प्रदीयते। तेषां कानि चिदुदाहरणानि निम्नोल्लिखितानि। ध्वन्यलोकस्य तृतीयोद्द्योते वृत्तिग्रन्थे भगवद्भक्तेः अपूर्वा महिमा अपि अभिव्यनक्तिः। वर्धनाचार्येण यथा आह-

"या व्यापारवती रसान् रसयितुं काचित् कवीनां नवा
दृष्टिर्या परिनिष्ठितार्थविषयोन्मेषा च वैपश्चिती।
ते द्वे अप्यबलम्व्य विश्वमनिशं निर्वर्णयन्तो वयं

[4] नाट्यशास्त्रम्, सुरेश वन्द्योपाध्याय च छन्दा चक्रवर्ती (सम्पा), पृ-१७
[5] रसगङ्गाधरः, पण्डित मदनमोहन झा (सम्पा) पृ-२१४
[6] ध्वन्यालोकः, श्रीकालीपद भट्टाचार्येन सह श्री सुवोधचन्द्र सेनगुपत (सम्पा), पृ-१४०
[7] तत्रैव


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

श्रान्ता नैव च लब्धमद्धिशयन त्वद्भक्तितुल्यं सुखम्।।”[8]

कविर्दृष्टिसाहाय्येणैव नव-नवायमानं विश्वं वीक्ष्य यो रसः आस्वाद्ययिष्यते। भगवद्भक्तिजन्यं सः लोकत्तरानन्दः तद्विविधानन्दतः अतिशयितं भिन्नम्। पण्डितराजजगन्नाथेनापि भगवतादिमुनिवचसाम् प्रामाण्यमनपेक्ष्य भक्तिं रसरूपेण स्वीकार्ये कुण्ठितवानासीत्। सोऽपि कृष्णभक्तेः लोकत्तरमाधुर्य़विषये सचेतनासीत्। तस्योदाहरणं रसगंगाधरग्रन्थस्य प्रथमे श्लोके तेन मङ्गलायते-

“स्मृतापि तरुणातपं करुणया हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम्।
कलिन्दगिरिनन्दिनी-तट-सुरद्रुमालम्विनी
मदीयमतिचुम्विनी भवतु कापि कादम्विनी।।”[9]

**उज्ज्वलनीलमणौ संक्षिप्तं भक्तिरसविमर्शम्-**

प्राचीनालंकारिकैः भरतादिभिः भक्तिरसविमर्शने तेषां व्याख्यानम् न परिलक्ष्यन्ते। प्रोक्ताः अष्टविधरसेषु भक्तिरसः न गण्यते। १७ शतकीये जगन्नाथाचार्येणापि भक्तिः न स्वीकृता। रसप्रस्थानादिप्रसिद्धिभिराचार्यैः देवादिविषयकं रतिं भक्ति इत्यनुक्त्वा भाव इत्युक्तम्। तथा चाह प्रकाशे मम्मटेन-

“रतिर्देवादिविषया व्यभिचारी तथाञ्जितः।
भावः प्रोक्तः -”[10]

जगन्नाथस्य वचनमपि अत्रैव प्रणिधानयोग्यमित्यहं मन्ये- “अथ कथमेत एव रसाः, भगवदालम्वनस्य रोमाञ्चाश्रुपातादिभिरनुभावितस्य हर्षादिभिः परिपोषितस्य भगवतादिपुराणश्रवणसमये भगवद्भक्तैरनुभूयमानस्य भक्तिरसस्य दुरपह्नवत्वात्? भगवदनुरागरूपा भक्तिश्चात्र स्थायिभावः। न चासौ शान्तरसेऽन्तर्भावमर्हति, अनुरागस्य वैराग्यविरुद्धत्वात्। उच्यते- भक्तेर्देवादिविषयरतित्वेन भावान्तर्गततया रसत्वानुपपत्तेः। इति हि प्राचां सिद्धान्तात्।...भरतादि-मुनिवचनानामेवात्र रसभावत्वादिव्यवस्थापकत्वेन स्वातन्त्र्यायोगात्।...रसानां नवत्वगणना च मुनिवचननियन्त्रता भज्येत इति यथाशास्त्रमेव ज्यायः।”[11] परन्तु वैष्णवपादाचार्यैः भाव इत्यनुक्त्वा मधुराभक्तिरेवोच्यते। यद्यपि शतशशास्त्रपारङ्गमधुरन्धराचार्यैः एषा मधुरा भक्तिः न व्याख्याता। तथापि तेषां पाण्डित्यं परिलक्ष्य मन्दमतिर्मया “पिवत भागवतं रसम्”[12] इति न्यायेन वामनवदुद्वाहूत्तलनेन चन्द्रशोभां प्राप्तुमीशते।

एषा भक्तिविद्या न तु वैधीमार्गकानां मनुष्यानां कृते। तच्च कारणं दुरूहत्वात्, अनुपयुक्तत्वात्, रहस्यत्वाच्च। तथा ये केचित् भागवते मधुररसाश्रियणः भक्तारासन्, ते केवलम् अस्याधिकारिणः। न तु स्थूलदृष्ट्या कामबुद्या अरुचिमतां प्राकृतलोकानाम् कृते उपयुक्तत्वम्। तथा च भणितम् रूपगोस्वामिना स्वोपज्ञव्याख्यायाम्-

“निवृत्तानुपयोगित्वाद्दुरूहत्वादयं रसः।
रहस्यत्वाच्च संक्षिप्य वितताङ्गोऽपि लिख्यते।।”[13]

शान्तदास्यसख्यवात्सल्यमधुररसेषु मधुरभक्तिरसरेव चरमोत्कृष्टः परमरसः। वृन्दावनवासिनः मधुसूदनः हि अस्याभक्तेः धारकवाहकश्चेति। सो एव ‘भक्तिरसराट्’ इत्यभिधानेन आख्यायते। तथा चोक्तं नीलमणौ गोस्वामिपादेन-

“मुख्यरसेषु पुरा यः संक्षेपेणोदितो रहस्यत्वात्।
पृथगेव भक्तिरसराट् विस्तरेणोच्यते मधुरः।।”[14]

---

[8] ध्वन्यालोकः, श्रीकालीपद भट्टाचार्येन सह श्री सुवोधचन्द्र सेनगुपत (सम्पा), पृ-२४३

[9] रसगङ्गाधरः, पण्डित मदनमोहन झा (सम्पा) पृ-१

[10] काव्यप्रकाशः, रामानन्द आचार्यः (सम्पा), पृ- १७, ४ उल्लासः

[11] रसगङ्गाधरः, पण्डित मदनमोहन झा (सम्पा) पृ-१९०

[12] उज्ज्वलनीलमणिः, श्रीमद्भक्तिवेदान्तनारायणगोस्वामिमहाराजेन सम्पादितः, लोचनरोचन्याम् पृ-२

[13] उज्ज्वलनीलमणिः, श्रीमद्भक्तिवेदान्तनारायणगोस्वामिमहाराजेन सम्पादितः, पृ-५

[14] उज्ज्वलनीलमणिः, श्रीमद्भक्तिवेदान्तनारायणगोस्वामिमहाराजेन सम्पादितः, पृ-४

विभावेषु आलम्बनोद्दीपनभेदतो द्विविधेषु मध्ये प्रथमालम्बना उच्यन्ते- श्रीकृष्णो विषयालम्बनः। वल्लभाः कृष्णस्य आश्रयालम्बनाः। प्रसङ्गेऽस्मिन् उक्तम्- तत्र विभावेष्वालम्बना- “अस्मिन्नालम्बनाः प्रोक्ताः कृष्णस्तस्य च वल्लभाः”। आश्रयालम्बनायाः दृङ्गात्रमुदाहरणं प्रदेयम्-

“पददयुतिविनिर्द्धुतस्मरपरार्धरूपोद्धति-
र्दृगञ्चलकलानटीपटिमभिर्मनोमहिनी।
स्फुरन्नवघनाकृतिः परमदिव्यलीलानिधिः
क्रियात्तव जगत्त्रयीयुवतिभाग्यसिद्धिर्मुदम्।।”[15]

पद्यस्यास्य रहस्यमेतत् यत् तदेव लक्ष्यादिसर्वयुवतिचित्ताकर्षणलिङ्गत्वेन वैकुन्ठनाथपर्यन्तसर्वानयकवृन्दविजेतृत्वं च दृश्यते। राधायाः पदद्युतिरित्यादिविशेषणैः श्रीकृष्णं प्रति तस्या शृङ्गारादिभावा अभिव्यञ्जयति। परन्तु शृङ्गाररसस्य प्रकटस्यापि शृङ्गाररसगर्भे वीररसस्य स्थितेर्घटना अपरिलक्षितैवेति रहस्यविद्या।

श्रीलरूपगोस्वामिना कृष्णविषयकं मधुररतेः स्थायिभावस्य त्रिधा विभज्यते- साधारणी, समञ्जसा, च समर्था। तथा चाह गोस्वामिपादेन-

“रति स्वभावजैव स्यात् प्रायो गोकुलसुभ्रूवाम्
साधारणी निगदिता समञ्जसा चासौ समर्था च।
कुब्जादिषु महिषीषु च गोकुलदेवीषु च क्रमतः
मणिवच्चिन्तामणिवत् कौस्तुभमणिवत् त्रिधाऽभिमता।
नातिसुलभेयमभितः सुदूर्लभा स्यादनन्यलभ्या च।।”[16]

त्रिप्रकारेषु स्थायिभावेषु पूर्वपूर्वभावत उत्तरोत्तरभावः अधिको उत्कर्षमाणः। अतः समर्था रतिरिव उद्रिक्त्वा महाभावदशा सञ्जाता। गोकुलदेव्य एव अस्याधिकारिण्यः। श्रीभगवतः स्वाभाविकी शक्तिरिव ह्लादिनी। भक्त्याधिकारीनाम् मनुष्यगणानां हत्सु अनभिव्यक्तं भगवद्विषयकं रतिं ह्लादिन्या शक्त्या रसास्वादनानुकूलं सम्पादयतीति।

**<u>उज्ज्वलनीलमणौ स्थायीभावप्रकरणस्य संक्षिप्तं विवरणम् :-</u>**

श्रीमधुसूदनसरस्वत्याचार्येण भक्तिरसायननामके ग्रन्थे 2/74 श्लोकस्य व्याख्याप्रसङ्गे प्रोक्तं यद्, तदेव आशृङ्गाराद् शान्तपर्य्यन्तं नवरसो हि सुप्रसिद्धः भवति तथा सर्वे आलंकारिकाः अनुगृह्णन्ति। एषः आलंकारिकगणः भक्तिरसं शान्तरसे एव अन्तर्भावयितुं इच्छति। अस्मिन् विषये केचन अवरुद्धमानाः। तेषान्मते भगवद्विषयकशुद्धरतेः स्थायिभावत्वात् नवरसेभ्यः पृथक् रसः भवति । सः एव भक्तिरसः नाम्ना परिचीयते। तथा चोक्तं भक्तिरसायने-

“रसान्तरविभावादिराहित्ये तु स्वरूपभाक्
दशमीमेति रसतां सनकादेरिवाधिकाम्”।[17]

परमपूज्यपादेन श्रीरूपगोस्वामीना भक्तिरसामृतसिन्धौ भक्तिस्वरूपमाह –

“अन्याभिलाषितशूण्यं ज्ञानकर्माद्यनावृतम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा।।”[18]

अनवद्योऽयं प्रेमतत्त्वः सर्वेषां चित्तं आकर्षयति। अस्य सौन्दर्यं युगे यगे रसिकानां हृदयान् चमत्कारं विशुद्धञ्च जनयति। अत इमं प्रेमरसं वैष्णवकाव्यरसज्ञैः मधुराख्यया भक्तिरसे निविश्यते। इयं मधुरभक्तिः भक्तहृदयान् अनिर्वचनीयानन्देन परिप्लुतत्वात् वैष्णवालंकारकै उज्ज्वलाख्यया आख्यायिता- ‘चमत्कारावहतया उज्ज्वलाख्यो रसः स्यात्’।[19]

---

[15] तत्रैव, पृ-६

[16] प्राचीन भारतीय अलंकार शास्त्रेर भूमिका, विष्णुपद भट्टाचार्य्य (सम्पा), पृ- ५३-५४

[17] भक्तिरसायनः - 2/74

[18] भक्तिरसामृतसिन्धुः – 11, पूर्वविभागः, प्रथमलहरी)

[19] प्रीतिसन्दर्भः


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ ✉ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

उज्ज्वलनीलमणाख्ये ग्रन्थे स्थायिभावप्रकरणे परमपूज्यपादेन रूपगोस्वामिना कथयति –'स्थायिभावोऽत्र शृङ्गारे कथ्यते मधुरा रतिः'।[20] अभियोगादिविषयेभ्यः सा रतिर्युत्पत्तिर्भवति। ते च स्थायीभावप्रकरणे श्लोकेन निवन्धिताः-

"अभियोगाद्विषयतः संबन्धादभिमानतः।
सा तदीयविशेषेभ्य उपमातःस्वभावतः।
रतिराविर्भवेदेषामुत्तमत्वं यथोत्तरम्"।।[21]

अभियोगस्य लक्षणं निरूपयन्नाह- 'अभियोगो भवेद्भावव्यक्तिः स्वेन परेण च'।[22] अर्थात् नायकस्य स्वाभियोगो नायिकाया रतिप्रादुभार्वे कारणम्। विषयस्तु 'शब्दस्पर्शादयः पञ्च विषयाः किल विश्रुताः'।[23] सम्बन्धस्य लक्षणमेतद् – 'संबन्धः कुलरूपादिसामग्रीगौरवं भवेत्'।[24] अभिमानञ्च - 'सन्तु रम्याणि भूरीणि प्रार्थ्यं स्यादिदमेव मे। इति यो निर्णयो धीरैरभिमानः स उच्यते'।[25] अभिमानोऽयं ममत्वास्पदे कोऽप्यनन्यतामयः संकल्पविशेषः स च रूपादिकमनपेक्ष्यापि रतिमुत्पादयति। तदीयविशेषास्तु – 'तदीयानां विशेषाः स्युः पदगोष्ठप्रियादयः'।[26] उपमायाः लक्षणम्- 'यथा कथंचिदप्यस्य सादृश्यमुपयोगिता'।[27] सेयं प्राचीना तदीयसाधनातिशयभाविता रतिस्तमुपमानं सोपां विधायोपमेये एव चित्तं प्रापयन्ती रञ्जयन्तीति भावः। स्वभावस्य वैशिष्ट्यमेव – 'बहिर्हेत्वनपेक्षी तु स्वभावोऽर्थः प्रकीर्त्तितः। निसर्गश्च स्वरूपं चेत्येषोऽपि भवति द्विधा'।[28] पूर्वजन्मानुभूत अभ्यासगतो संस्कारविशेषः निसर्गो इत्युच्यते। गुणरूपदिश्रवणेन एनमुद्बोधयति- 'निसर्गः सुदृढाभ्यासजन्यः संस्कार उच्यते। तदुद्बोधस्य हेतुः स्याद्गुणरूपश्रतिर्मनाक्'।[29] सा रति अजन्यत्वात् स्वतःसिद्धत्वात् भावोच्यते। स्वभावजा मधुरा रतिः त्रिविधा – साधारणी,समञ्जसा तथा समर्था। कुब्जाया रतिः साधारणी, श्रीकृष्णस्य महिषीगणानां रतिः समञ्जसा तथा गोकुलदेवीनां रतिः समर्था। तथा च प्रोक्तम् स्थायीभावप्रकरणे-

"रतिः स्वभावजैव स्यात्प्रायो गोकुलसुभ्रुवाम्" ।[30]

**<u>साधारणी रतिः –</u>**

श्रीलरूपगोस्वामिना साधारण्याः रतेः स्वरूपमाह-

"नातिसान्द्रा हरेः प्रायः साक्षाद्दर्शनसम्भवा।
संभोगेच्छानिदानेयं रतिः साधारणी मता।।"[31]

स्वसुखवासनामूलका सम्भोगेच्छा वृद्धित्वात् रतेः वृद्धिः भवति। तस्याः ह्रासत्वेन रतेरपि गुणीभवति। सम्भोगेच्छा एव साधारण्याः रतेः मूलस्वरूपम्। यथोक्तं नीलमणौ-

---

[20] उज्ज्वलनीलमणिः – स्थायीभावप्रकरणम् –पृ-638
[21] तत्रैव,पृ-640
[22] तत्रैव, पृ-641
[23] तत्रैव, पृ-643
[24] तत्रैव, पृ-649
[25] तत्रैव, पृ-650
[26] उज्ज्वलनीलमणिः – स्थायीभावप्रकरणम्, पृ-652
[27] तत्रैव, पृ-655
[28] तत्रैव, पृ -656
[29] तत्रैव, पृ-657
[30] तत्रैव, पृ-664
[31] तत्रैव, पृ-667


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

“असान्द्रत्वाद्रतेरस्याः संभोगेच्छा विभिद्यते।
एतस्या ह्रासतो ह्रासस्तद्धेतुत्वाद्रतेरपि।।”[32]

**समञ्जसा रतिः-**

अस्याः रतेः स्वरूपं गोस्वमीपादेन पदाङ्कितम्-

“पत्नीभावाभिमानात्मा गुणादिश्रवणादिजा।
क्वचिद्भेदितसंभोगतृष्णा सान्द्रा समञ्जसा।।”[33]

श्रीकृष्णस्य गुणादिश्रवणत्वात् हृदि रतिरियं जागरति। यस्यां रतौ पत्नीत्वाभिमानसंबन्धिनी बुद्धिर्भवतीत्यर्थः। समञ्जसायां रतौ कदाचित् सम्भोगेच्छा अपि स्फुटयति। न केवलं गुणादिश्रवणजन्या आदौ कृष्णप्रेयसीनां हृत्सु इयं रतिः समुद्भवति। रुक्मिण्यादीनां वयःसंधावेव नारदादिमुखवर्णितश्रीकृष्णगुणश्रवणादिना उद्बुद्धः भवति।

**समर्था रतिः –**

श्रीकृष्णस्य रूपमाधुर्यदर्शनाद्वा गुणावलीश्रवणादिव्यतिरेकेनापि प्रेयसीगणानां चित्ते श्रीकृष्णं प्रति समर्था रतिः व्यनक्ति तथा द्रुतत्वात् प्रगाढं प्राप्नोति। सा रतिः कृष्णसुखैच्छया तात्पर्यमयी। नास्ति तत्र स्वसुखवासना। अस्याः रतेः स्वरूपं नीलमणौ भणितम्-

“कंचिद्विशेषमायान्त्या संभोगेच्छा ययाऽभितः।
रत्या तादात्म्यमापन्ना सा समर्थेति भण्यते।।”[34]

सामर्थ्यमेव दिग्दर्शनेनाह- सर्वं कुलधर्मधैर्यलोकलज्जादिकं विस्मारयितुं शीलं यस्य तथाभूतो गन्धोऽपि यस्याः सा। ‘या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुः’[35] इति। अत एव सान्द्रतमा भावान्तरेण प्रवेष्टुमशक्यतमा। एवंविधतया सामान्यरूपेण रतेः भेदविमर्शणं मया दर्शितम्।

**दार्शनिकत्वं विचारणीयं परकीयायाः उपासनायाः**

मधुरभक्तिरससाधनायां परकीयोपासनैव सर्वश्रेष्ठा विद्यते। अर्थात् मधुररसस्य चरमपरिणतिः परकीयोपासनायामेव परिदृश्यते। यथा चिन्तामणिः प्रदीपबुद्ध्याऽपि परिगृहीतः सन् वस्तुतश्चिन्तामणिरेव न तु प्रदीपस्तथैव भगवति जारबुद्ध्याऽपि प्रवृत्तौ सत्यां भगवत एव प्राप्तिर्जायते, न तु अन्यस्य। इत्थञ्च परकीयोपासनायां परकीयप्रियतमारूपजीवात्मन उपपतिरूपप्रियतमपरमात्मनश्च परस्परं प्रदर्शितप्रणयव्यापारद्वाराऽनन्यासक्तिरेव चरमोत्कर्षं फलं विद्यते।

श्रीकृष्णभक्तिसम्प्रदायेषु गौडीयवैष्णभक्तिसाधनायां च परकीयोपासनायाः प्राधान्यं वर्तते। तदुपासकानां मते यथा शान्तभक्तिरसापेक्षया दास्यभक्तिरसे, तदपेक्षया सख्यभक्तिरसे, तदपेक्षया वात्सल्यभक्तिरसे, तदपेक्षया मधुरभक्तिरसे भगवद्विषयिणी रतिः क्रमश उत्तरोत्तरमधिकाधिकरूपेण चरमोत्कर्षत्वमेति तथैव यद्यपि स्वकीयायं परकीयायाञ्चोपासनायां भगवद्विषयकरतेः विकासो जायते, किन्तु स्वकीयापेक्षया परकीयोपासनायामेव भगवद्रतेः पूर्णविकासो भवति। तत्रैव मधुररसरसिकैः परमानन्दः समनुभूयते। यद्यपि शिष्टैः परकीयोपासना विगर्ह्यते किन्तु मधुरभक्तिरससाधनायां परकीयोपासनैव चरमोत्कर्षफलमिति स्वीक्रियते मधुररसरसिकैः। गोपाङ्गनैव परकीयोपासनायाः परमावधिस्तत्रापि मधुरमधुमयी कलधौतद्युतिदैरेयकश्रीः, वदनदमितराकारोहिणी, कान्तकीर्तिः, मदमत्तचकोरचारुताचोरदृष्टिः श्रीराधा सर्वोपरि स्वीक्रियते। सैव परकीयाभावस्यचरमोदाहरणभूता, प्रमाणस्वरूपा वा विद्यते।

---

[32] उज्ज्वलनीलमणिः - स्थायीभावप्रकरणम् -पृ -667

[33] तत्रैव, पृ-668

[34] तत्रैव, पृ-671

[35] तत्रैव, पृ-673


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

Volume – 2 | Issue – IV | Jul-Aug 2025 | ISSN: 3049-0278 (Online)

AIJITR

Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

गौडीयवैष्णवसम्प्रदायेऽपि वस्तुतो गोपीनां श्रीकृष्णेन सह परकीयात्वं न स्वीक्रियते, अपि तु प्रकटलीलायामेव तासां गोपीनां परकीयता, अन्यथा गोप्यः श्रीकृष्णस्य स्वीया एव।[36] एवञ्च जीवगोस्वामिमते परकीयोपासनायां न किमपि जुगुप्सितत्त्वमिति। अत एव तन्मते जुगुप्सितत्त्वं तु प्राकृतनायक एव संभवेत् न तु दिव्यनायके भगवति। तत्र तु सर्वमेवोपयुज्यते, यतो हि परमात्मैव सर्वेषां पतिरस्ति। प्रीतिसन्दर्भकृता उक्तम्-

यत्तु कश्चित्परकीयासु लघुत्वं व्यनक्ति, तत्खलु प्रकृतनायकमवलम्बमानासु युक्तम्, तत्रैव जुगुप्सितत्वात्। अत्र तु गोपीनां तत्पतीनां चेत्यादिना तत्प्रत्याख्यानात्।।[37]

यद्यपि भारतीयसमाजे परकीयोपासना विगर्ह्यते, धर्मशास्त्रानुसारेण च परकीयाभावभावितानां नरकगामिता प्रतिपादिता, तथापि सुखविशेषलाभाय यथा नारी परपुरुषं सेवते तथैव व्रजवल्लभा अपि लोकपरलोकादिसरलचिन्तां विहाय श्रीकृष्णमेव भजन्तीति परकीयात्वमभीष्ठमिति।

यद्यपि रसिकोपासनायां राधादयो व्रजवल्लभाः श्रीकृष्णस्य स्वकीया एव, किन्तु रसविशेषलाभाय लीलादृष्ठ्या च तासां परकीयात्वं निरूप्यते। वस्तुतस्तत्र योगमायाप्रभावेण व्रजवल्लभानां प्रतिकृतय एव पतिं मन्यमानानां गोपानां गृहे स्थिता आसन्, प्रकृतगोपीनां तु तैः सह संगमः कदापि नाभूत्। उज्ज्वलनीलमणिकृता उक्तम् –

मायाकलितताद्दक्स्त्रीशीलनेनानसूयुभिः।
न जातु व्रजदेवीनां पतिभिः सह सङ्गमः।।[38]

एवमेव भागवतेऽपि प्रतिपादितम् –

नासूयन् खलु कृष्णाय मोहितास्तस्य मायया।
मन्यमानाः स्वपार्श्वस्थान् स्वान् स्वान् दारन्वजौकसः।।[39]

अपि च पूर्वोक्तमायाकल्पितत्वं विश्वनाथचक्रवर्तिना स्वीकृतम्-

मायया योगमाययैव, न तु बहिरङ्गया मायया। भगवतो धाम्नि सिद्धपरिवारेषु च तस्या अधिकाराभावात्। तन्मोहितानां भगवद्वैमुख्यस्यवश्यंभावात्, तेषां गोपानां तु भगवद्वैमुख्यमात्रादर्शनात्।[40]

एवञ्च परिदृश्यते व्रजवल्लभाः स्वप्रियतमेन श्रीकृष्णेन सह रमणशीलाः सततं स्वपतिं विहाय श्रीकृष्णमभिसरन्ति स्म। एवञ्च परिज्ञायते व्रजवल्लभाभिः सह श्रीकृष्णस्य वासनात्मकामो नास्ति, अपि तु परस्परं विशुद्धं प्रेमैव विद्यते। इत्थञ्च ज्ञायते भक्तिरससाधनायां परकीयोपासनाया महद्वैशिष्ट्यं वर्तते।

पूर्वोक्ततर्कानुसारेण यद्यपि व्रजवल्लभानां शुद्धत्वं सच्चरितत्त्वं पातिव्रत्यञ्च प्रतिपादितम्, किन्तु 'कान्तासम्मितयोपदेशयुजे' इति सत्काव्यप्रयोजनमुपपतिना सह कृतव्यवहारेण व्याहन्यते। तत्र भक्तानां मते स्वकल्याणमिच्छद्भिः साधकैः भक्तवत् वर्तितव्यम् न तु श्रीकृष्णवदिति भक्तिशास्त्राणां तात्पर्यम्।

**अन्ये विभागाः भक्तिरसस्य –**

अतीतवर्तमानकालिकभक्तिवासनाविगलिते द्रुते चित्ते प्रेमाभक्तियुक्तविभावानुभावसञ्चारिसंयोगाद् भक्तिरसः साधकैः आस्वाद्यते। स च भक्तिरसः भक्तिरसज्ञानां विदुषां मते मुख्यगौणभेदेन द्वादशप्रकारो अस्ति। तत्र शान्तभक्तिरसः, प्रीतिभक्तिरसः, प्रेयोभक्तिरसः, वात्सल्यभक्तिरसः, मधुरभक्तिरसश्चेति पञ्चमुख्यभक्तिरसाः, तथा हास्यभक्तिरसः, अद्भुतभक्तिरसः, वीरभक्तिरसः, करुणभक्तिरसः, रौद्रभक्तिरसः, भयानकभक्तिरसः, वीभत्सभक्तिरसश्चेति सप्तगौणभक्तिरसाः प्रतिपादिताः श्रीरूपगोस्वामिना भक्तिरसामृतसिन्धौ।

**शान्तभक्तिरसः**

स्वविभावानुभावसात्त्विकसञ्चारिभिः परिपोष्यमाना शान्तरतिरेव शान्तभक्तिरसरूपेण अभिव्यज्यते। तस्य स्थायिभावः शान्तरतिः, तस्याश्च समासान्द्रश्चेति द्वौ भेदौ। तत्र योगिनो सम्प्रज्ञातसमाधौ भगवत्स्वरूपा समुद्गूता रतिः समा –

---

[36] वस्तुतः परमस्वीयाः, अपि प्रकटलीलायं श्रीव्रजदेव्यः। प्रीतिसन्दर्भे पृष्ठे ९८४१

[37] प्रीतिसन्दर्भे पृ. ९४७ श्रीजीवगोस्वामिकृते

[38] उज्ज्वलनीलमणौ ३१

[39] भागवते ११।३३।३८

[40] भागवते १०।३३।३८ सा. द. टीकायाम्


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ ✉ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

समाधौ योगिनस्तस्मिन्न सम्प्रज्ञानाम्नि।
लीलायमपि लब्धेऽस्य बभूवोत्कम्पिनी तनुः।।[41]

इति तथा च या परमात्मदर्शनोद्भूता रतिः सा निर्विकल्पसमाधेरपि सहस्रगुणाधिकसान्द्रत्वात् सान्द्रेति कथिता। शान्तभक्तिरसे नराकृतिश्चतुर्भुजः परमात्माविषयालम्बनरूपः, सनकसनातनादयस्तपस्विनश्च ज्ञानिनो मुमुक्षां त्यक्त्वा श्रीकृष्णतद्भक्तकृपया भक्तिवासनायुक्ता यदि भवेयुस्तदा ते आश्रयालम्बनानि। तत्त्वविचारवनशैलादिवासिजनसङ्गसिद्धक्षेत्राद्या उद्दीपनविभावाः। नासिकाग्रदृष्टिरवधूतचेष्ट। निर्ममता भगवद्द्वेषिजनेऽपि द्वेषराहित्यं तद्भक्तजनेऽपि नातिभक्तिमौनं ज्ञानशास्त्रे अभिनिवेश इत्यादयो अनुभावाः। शीतासाधारण-शीतसाधारणभेदेनानुभावो द्विविधः, तत्र निरपेक्षता, निष्कामता, निर्वैरभावः, निरहङ्कारता, निर्भयता, सुखदुखसमभावः,ध्यानम् इत्यादयश्च शीतासाधारणानुभावास्तथा जृम्भा, अङ्गपीडनम्, स्तवनमित्यदयश्च शीतसाधारणानुभावाः कथ्यन्ते। अश्रुपातरोमाञ्चाद्याः प्रलयवर्जिताः सात्त्विकभावाः, निर्वेदमतिधृत्यादयः सञ्चारिणः सन्ति। यद्यपि नाट्ये निर्विकारप्राधान्येन शमस्थायी शान्तस्य स्थानं न स्वीक्रियते, नाट्ये तस्य अभिनयस्य अशक्यत्वात्, किन्तु रतियुक्तत्वेन भक्तिरसज्ञैस्तत्र शान्तभक्तिरसः गृह्यते। शान्त भक्तिरसस्य उदाहरणं यथा –

कदा शैलद्रोण्यां पृथुलविटपि क्रोडवसतिः,
वसानः कोपीनं रचितफलकन्दाशनरुचिः।
हृदि ध्यायं ध्यायं मुहुरिह मुकुन्दाभिधमहं,
चिदानन्दं ज्योतिः क्षणमिव विनेष्यामि रजनीः।।[42]

**प्रीतिभक्तिरसः –**

स्वानुरुपैर्विभावानुभावसात्त्विकसञ्चारिभिः परिपुष्टा भगवद्विषयिणी प्रीतिरेव भक्तानां चेतसि समास्वाद्यतां प्राप्य प्रीतिभक्तिरससंज्ञां प्राप्नोति। भक्तिरसामृतसिन्धुकृता उक्तम् –

आत्मोचितैर्विभावाद्यैः प्रीतिरास्वादनीयताम्।
नीता चेतसि भक्तानां प्रीतिभक्तिरसो मतः।।[43]

प्रीतिभक्तिरसस्य स्थायिभावो भगवद्विषयिणी रतिरेव। अनुग्राह्यस्य दासत्वात् सम्भ्रमप्रीतिलौल्यभेदाश्च गौरविप्रीतिरिति तस्य द्वौ भेदौ स्तः। तत्र स्वानुरूपविभावादिभिः परिपुष्टा सती संभ्रमयुक्ता प्रीतिरेव सम्भ्रमप्रीतिरसरूपे परिणमते। आलम्बनभावः तस्य निष्कारणकरुणावरुणालयः, अशरणशरण्यः, दिव्यगुणगणविशिष्टः, सुदृढव्रतः, सर्वज्ञः, सर्वरक्षकः, कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थः, सर्वशक्तिमान् परमाराध्यः परमात्मा विषयालम्बनम् तथा प्रभुनिर्देशवशवर्त्तिनः, प्रभुताज्ञानविनम्रधियः, विश्वस्ताः, आज्ञापालकाः, भगवद्विषयकश्रद्धावन्तः, दासभावापन्नाः भक्ता आश्रयालम्बनानि भवन्ति। तेषां दासभावापन्नानां भक्तानां च अधिकृताश्रितपारिषदनुगेति चत्वारो भेदा भवन्ति। तत्राधिकृतस्तु भगव्तप्रदत्तां कामपि सेवां सम्पादयन् भगवन्तं सेवते यथा जगतः स्रष्टा प्रजापतिर्ब्रह्मा, देवानां राजा महेन्द्रश्चेति। शरण्यः, ज्ञानिचरः, सेवानिष्ठश्चेति भेदेन केवलं भगवन्निष्ठ आश्रितो भक्तः त्रिप्रकारको भवति, तत्र शरणागतः सुग्रीवविभीषणादयस्तथा जरसन्धवद्धराजादयश्चेति। ज्ञाननिष्ठास्तु भगवत्तत्त्वं विज्ञाय मोक्षस्यापि कामनां विहाय केवलं भगवन्तं समाश्रिताः शौनकादयः। सततं भगवत्सेवापरायणा हनुमत्पुण्डरीकादयः सेवानिष्ठभक्ताः सन्ति। भगवत्सेवापरायणा अपि समये समये ये भगवन्तमपि मन्त्रयते, ते दारुकोद्धवनन्दादयः पारिषदो भक्ताः सन्ति। ये च भक्ताः सर्वदा भगवतो अनुगमनं सेवनं वा कुर्वन्ति ते अनुगतभक्ता इति कथ्यते। तस्य च पुरस्थब्रजस्थभेदेन द्वौ भेदौ भवतः। धुर्य-धीर-वीरभेदेन पारिषद्भक्तस्य भेदत्रयमिति। उद्दीपन्नभावस्तु साधारणासाधारणाभ्यां द्विविधः। तत्र साधारणस्तु भगवदनुग्रहप्राप्तिः, तत्पदरजः प्राप्तिः, तद्भक्तानां सान्निध्यम्, तेषां सत्सङ्गः, भुक्तावशिष्टप्रसादप्राप्तिश्चेति, असाधारणस्तु भगवदीषद्हास्यम्, तस्य गुणगणश्रवणं कीर्त्तनं, मुरलीनादः, श्रृङ्गनादादयश्चोद्दीपनभावेति कथ्यन्ते। अनुभावश्चापि साधारणासाधारणभेदेन द्विविधः, तत्र स्वकर्त्तव्यपालनम्, स्वेष्टे परमनिष्ठा, भगवद्भक्तेषु द्वेषराहित्यम्, तेषु मैत्रीभावाश्चासाधारणानुभावास्तथा भगवत्सम्मानितेषु

[41] भ. र. सि. ३।१।२४ कारिकोदाहरणम्
[42] भ. र. सि. ११ कारिकोदाहरणम् पृ. ३२०
[43] भ. र. सि. ३।२।३

मित्रेषु सम्मानम्, तद्विन्नेषु वैराग्यश्चेति साधारणानुभावा भवन्ति। स्तम्भादयाः सर्वे सात्त्विकभावा भवन्ति। सामान्यतया यद्यपि सर्वे सञ्चारिभावाः स्वीक्रियन्ते तथापि मदश्रमत्रासापस्मारालस्यौभयक्रोधासूयानिद्रादयः प्राधान्येन स्वीक्रियन्ते।

प्रभुताज्ञानयुक्तत्त्वेन भक्तानां चेतसि समुत्पन्नः कम्पः समादरो वा सम्भ्रमः, तेन चैक्यं प्राप्तवतती प्रीतिरेव सम्भ्रमप्रीतिरिति कथ्यते। सा च सम्भ्रमप्रीतिः प्रेम-स्नेह-रागभेदेन त्रिविधा भवति। शङ्कारहितवद्धमूला प्रीतिः प्रेमेयुच्यते, तेन प्रेम्णा चित्तस्य सान्द्रद्रवस्थितिरेव स्नेह इति, दुःखेष्वपि सुखमनुभाविका विशिष्टभावदशैव रागश्चेति कथ्यते। सा संभ्रमप्रीतिर्योगायोगभेदेन पुनः द्विधा, अयोगोऽप्युत्कण्ठित-वियोगभेदेन द्विविधो जायते, तत्राद्दृष्टपूर्वस्य परमात्मनो दिदृक्षोत्कण्ठत्वम्, तत्रोत्कण्ठायाम् औत्सुक्यदैन्यनिर्वेदचिन्ताचापल्यजडतोन्मादमोहानां प्रावल्यं भवति। स्वेष्टस्य क्षणमपि विच्छेदो वियोगः, तत्र वियोगे तापः, कृशता, जाड्यम्, धैर्याभावः, व्याधिरुन्मादः, मूर्च्छा, जागरणम्, अवलम्बशून्यता, स्मृतिरिति दशावस्था समुत्पद्यन्ते।

गौरवप्रीतिः – गौरवप्रीतिः स्वविभावादिभिः परिपुष्टा सती गौरवप्रीतिरसरूपेण भक्तसहृदयसाधकैः समास्वाद्यते। श्रीकृष्णस्य लाल्यानां प्रद्युम्नसाम्बादीनां सम्बन्धिना श्रीकृष्णे गौरवमयीप्रीतिः गौरवप्रीतिः, सा एव स्वविभावादिभिः परिप्रष्ठासती गौरवप्रीतिरसरूपे परिणमते। रक्षकः, पालकः, बुद्धिबलविद्यायुक्तः श्रीकृष्णो अत्र विषयालम्बनम्। श्रीकृष्णस्य प्रेमभाजनानि प्रद्युम्नादय आश्रयालम्बनानि। श्रीकृष्णस्य वास्तल्येन सूर्यस्मितप्रेषणादय उद्दीपनभावाः। श्रीकृष्णस्य मार्गानुसरणम्, नमस्क्रिया, विनयाधिक्यम्, निजप्राणपरित्यागेनापि तस्याऽऽज्ञापरिपालनमित्यादयो अनुभावाः। सम्भ्रमप्रीतिवत् सर्वे स्तम्भादयः सात्त्विकभावास्तथा तद्वदेव सञ्चारिभावाश्चात्र भवन्ति। पुनरस्या अपि सम्भ्रमप्रीतिवदेव योगायोगादिप्रभेदा भवन्ति। प्रीतिभक्तिरसस्य उदाहरणम् –

पञ्चत्वं तनुरेतु भूतनिवहाः स्वांशे विशन्तु स्फुटं,
धातारं प्रणिपत्य हन्त शिरसा तत्रापि याचे वरम्।
तद्वापीषु पयस्तदीयमुकुरे ज्योतिस्तदीयाङ्गण-
व्योम्नि व्योम तदीयवर्त्मनि धरा तत्तालवृन्तेऽनिलः।।

**प्रेयो भक्तिरसः –**

स्वसमुचितविभावादिभिः परिपुष्टिं गता सख्यरतिर्भक्तानां चेतसि प्रेयोभक्तिरसरूपेण समास्वाद्यते। तथा हि भक्तिरसामृतसिन्धुकृता उक्तम् –

स्थायी भावो विभावाद्यैः सख्यमात्मोचितैरिह।
नीतश्चित्ते सतां पुष्टिं रसः प्रेयानुदीर्यते।।[44]

दास्यभावस्य प्रवृद्धा प्रीतिरेवोक्तरसरूपेण बुध्यते। दास्यभावे भक्तः प्रभोः समीपं मर्यादया विजृम्भतो नियन्त्रितश्च तिष्ठति। येन स्वहृगदयस्थं भावं नोपस्थापयति। किन्तु रसेऽस्मिन् भक्तः सम्भ्रमप्रीतेः स्थाने प्रागाढविश्वासात् सम्पूर्णप्रतिबन्धरहितो भवति। एवञ्चात्र विमुक्तसंभ्रमसख्यरतिरेव अस्य रसस्य स्थायिभवात्वेन निगद्यते।

द्विभुजश्रीकृष्णोऽस्य रसस्य विषयालम्बनं तस्य वयस्याश्चाश्रयालम्बनानि। सम्बन्धप्रागाढ्यात् पुरव्रजस्थभेदेन वयस्यस्य द्वौ भेदौ स्तः। तत्र पुरस्था भीमर्जुनादयः, मैत्रीभावदृष्ट्या व्रजसम्बन्धिभक्ताः सुहृत्सखाः, प्रियनर्मसखाः सखायश्चेति चतुर्धा भवन्ति। तत्र वयसा श्रीकृष्णापेक्षया श्रेष्ठाः, वात्सल्यभावेन युक्ताः, अत एव तत्रक्षणे सदा तत्पराः सुभद्रबलभ्रदादयः सुहृत्सखाः। समवयस्काः, अत एव श्रीकृष्णेन सह निःसङ्कोचभावेन कन्दुकादिक्रीडायां तत्पराः श्रीदामसुदामप्रभृतयः प्रियसखाः। श्रीकृष्णस्य परमरहस्यकार्येषु सहायकाः, प्रेयसीरहस्यसहाय्याः शृङ्गारभावानुमोदकाः सुवलादयो गोपाः प्रियनर्मसखाः तथा आयुषा श्रीकृष्णापेक्षया कनिष्ठाः प्रीतिसमन्विताः सेवासुखाभिलाषिणः मरन्दमणिबन्धादयः सखाय इति कथ्यन्ते।

ते चतुर्विधा भक्ता अपि नित्यप्रिय-सुचर-साधकभेदेन त्रिधा। तेषु केचित्स्वभावतः स्थिरमतयो मन्त्रिवत्तमुपासते, केचित्स्वभावचपलास्तं विदुषका इव परिहासयन्ति, केचित्सरलस्वभावाः सरलतापूर्वकं तं सेवन्ते, केचिन्नानाक्रीड्या विस्मापयन्ति। एवञ्च मित्राणि तस्य श्रीकृष्णस्य तं विविधस्वभावयुक्तैः सेवयन्तः पवित्रमैत्रीविचित्रचारुतां वर्धयन्ति।

[44] भक्तिरसामृतसिन्धौ ३।३।१


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

श्रीकृष्णस्य कौमारपौगण्डकैशोराणि वयांसि तथा शृङ्गं, वेणुः, शंखादयश्चोद्दीपनभावा भवन्ति। अस्मिन् रसे पौगण्डवयसः प्राधान्यम्, ब्रजे कौमारमपि सम्मतम्, कैशोरं तु सर्वत्रैव गृह्यते।

अस्मिन् रसे मुष्टामुष्टिलगुडालगुडिकन्दकद्युतवाहादिक्रीडाभिः श्रीकृष्णस्य मनोरञ्जनम्, पर्यङ्कदोलादिषु तेन सह समुपविश्य प्रहसनम्, विविधपरिहासः, जलविहारः, लास्यादयः, सर्वसाधारणक्रिया अनुभावा भवन्ति। स्वेदः, रोमाञ्चः, स्वरभङ्गः, कम्पादयश्च सात्त्विकभावास्तथा उग्रता, त्रासः, आलस्यञ्च विहाय सर्वे सञ्चारिणः अत्र परिगणिताः। तत्र योगे मृतिक्लमादयस्तथाऽयोगे मदहर्षगर्वनिद्राधृत्यादयः परित्यजन्ते। उत्तरोत्तरं परिवर्धमाना विमुक्तसंभ्रमस्थायिरूपसख्यरतिरेव क्रमशः प्रणय-प्रेम-स्नेह-रागादिरूपेण परिणमन्ते। तत्र च विप्रयोगे (वियोगावस्थायाम्) तापः जागर्यालम्बनशून्यताधृतिर्जडताव्याधिरुन्मादमूर्च्छामृतिश्चेति दशदशा अपि समुद्भाविताः।

प्रीतिभक्तिरसे वात्सल्यभक्तिरसे च विषयाश्रयलम्बनयो अन्योन्यं गौरवलाघवरूपभिन्नता भवति किन्तु प्रेयोभक्तिरसे अस्मिन् विषयाश्रययोः सर्वथा साम्यहेतुत्वादास्वाद्याऽऽधिक्यं जायते। तच्च सथ्यभावापन्नसहृदयसाधकैकगम्यमस्ति।

रसोऽयं प्रेयोरतिः तथा प्रेयान्रस इति रूपेण श्रीमधुसूदनस्वामिनाऽपि स्वीकृतः। श्रीनारायभट्टेनापि सख्यरतिस्थायिभावः प्रेयोभक्तिरसः स्वीकृतः। तथा हि भक्तिरसामृतसिन्धुकृता उक्तम् –

गौरवाद्यविनिर्मुक्ता विस्रम्भात् समयोर्द्वयोः।
सख्यरतिः स्थायिभावः सा ज्ञेया भक्तिवर्त्मगैः।।[45]

पूर्वोक्तविवेचनानुसारेण सजातीयमाधुर्यभावेन सहैव प्रेयोरसः चित्ते कमपि चमत्कारं जनयति। रसेऽस्मिन् भगवतो भक्तस्य च भाव समान एव, सेव्यसेवकयोर्भेदो नात्र सम्भवति। एवञ्च सर्वेषु रसेषु प्रेयोभक्तिरस एवातिशयप्रियो रसस्तदुपासकानां रसज्ञानां मते। स च प्रेयोरसः सख्यभावापन्नानां भक्तरसज्ञानां चेतसि एव प्रस्फुटति। प्रयोभक्तिरसस्य उदाहरणं यथा –

रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम्।
वृहदुरःश्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः।।[46]

**वात्सल्यभक्तिरसः –**

स्वसमुचितविभावानुभावसात्त्विकभावसञ्चारिभावैश्च परिपुष्टिं गता श्रीकृष्णविषया वत्सलरतिरेव वात्सल्यभक्तिरसरूपेणानुभूयते रसज्ञैः साधकभक्तैः। भक्तिरसामृतसिन्धुकृता तथा हि उक्तम् –

विभावाद्यैस्तु वात्सल्यं स्थायी पुष्टिमुपागतः।
एष वत्सलतामत्रः प्रोक्तो भक्तिरसो बुधैः।।[47]

तस्य स्थायिभावस्त्वनुकम्पनीयं प्रत्यनुकम्पयितुः सम्भ्रमरहिता वत्सलरतिरेव विद्यते। अस्मिन् रसे भगवान् बालकरूपेणोपास्यते। अत्र भगवतो विभूतेरैश्वर्यस्य परिज्ञानं नावबुध्यते। पितरौ यथा स्वबालककल्याणाय सततं हितं चिन्तयतः तथैव अत्रापि सैव भावना भगवन्तं प्रति क्रियते। अत्र तु प्रीतिरतेरिव सम्भ्रमस्य न स्थानम्, न वा प्रेयोरतेरिव विश्रम्भस्यैव स्थानम्, किन्तु तयो उपरि अनुकम्पाकर्त्तुर्गुरुवर्गस्य अनुकम्पैव स्वाभाविकी रतिर्भवति, सैव वत्सलरतिः, सैवास्य रसस्य स्थायिभावो मण्यते। एवञ्च नन्दयशोदादीनां श्रीकृष्णं प्रति या ममत्वभावना, यथा मम पुत्रोऽयं श्रीकृष्ण इत्यादिका, या अन्यत्रभावपदेन व्यवहृता, सैव अत्र वात्सल्यस्य प्राणः, यद्यपि श्रीकृष्णः अनन्तशक्तिसंवलितः तथापि ब्रजलीलाभूमौ समागते तस्मिन् मात्रा यशोदया ऊलूखले निबद्धः, तत्र केवलं वात्सल्यभक्तिरसस्यैव प्रभाव न अन्यस्येति। एवञ्च यशोदाप्रभृतेर्वत्सलरतिः स्वभावत एव प्रौढा विद्यते किन्तु लीलावैशिष्ट्येन कदाचित् प्रेमस्नेहरागत्वेनापि अवबुध्यते।

रसेऽस्मिन् सर्वसुलक्षणसमन्वितः, कोमलाङ्गः, श्यामाङ्गसुन्दरः, विनयी, दातृत्वादिगुणगणगरिष्ठः श्रीकृष्णो विषयालम्बनम्, अपि चात्र ज्ञानवैराग्यैश्वर्यादिज्ञानराहित्येन अनुग्राह्यरूपेण चालम्बनत्वमपि भवति श्रीकृष्णे। श्रीकृष्णे सद्भाववन्तो लालनपालनशिक्षादिव्यवस्थापकाः गुरवः, मातापित्रादयः, ब्रजेश्वरीब्रजराजो रोहिण्युपनन्दपत्न्यादयस्तथा देवकीकुन्तीवसुदेवादयश्चाश्रयालम्बनानि। प्रोक्ताश्रयलाम्बनेषु ब्रजेश्वरी ब्रजराजश्च सर्वश्रेष्ठ आश्रयालम्बने। रसेऽस्मिन् लाल्यरूपविषयालम्बनस्यैश्वर्यज्ञानं बाधकं भवति। श्रीकृष्णस्य कौमारं पौगण्डकिशोरे चापि वयः, रूपम्, वेषः, शैशवचापल्यम्, स्मितहास्यम्, जल्पनम्, लीलादयश्चोद्दीपनानि सन्ति। अपि चात्र श्रीकृष्णस्य स्वल्पदन्तता, शनैः शनैः

---

[45] भक्तिरसतरङ्गिण्यां पृ. १२०

[46] भागवते १०।३१।१७

[47] भक्तिरसामृतसिन्धौ ३।४।१


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

Volume – 2 | Issue – IV | Jul-Aug 2025 | ISSN: 3049-0278 (Online)
Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

मुहुर्मुहुः पादप्रक्रमता क्षणरुदितम्, क्षणहसितम्, स्वाङ्गुष्ठपानम्, उत्तानशयनम्, कराम्बुजे नवनीतम्, शिरसि काकपक्षः, शृङ्गमुरलीप्रभृतिवाद्यानां वादनादयश्च वात्सल्यभक्तिरसे वैशिष्ट्येनोद्दीपकाः भवन्ति।

श्रीकृष्णस्य मातृपितृगुरुवर्गैः शिरश्चुम्बनम्, मुखकपोलचुम्बनम्, आलिङ्गनम्, शरीरावयवसंवाहनम्, नामग्रहणपूर्वकमाह्वानम्, आशीर्वचनम्, लालनम्, पालनम्, पितोपदेशादयश्चानुभावे परिगणितानि। स्तन्यस्रावरूपनवमसात्त्विकभावसहितं स्तम्भादयः सर्वे अष्टौ सात्त्विकभावा भवन्ति अस्मिन् रसे। भक्तिरसज्ञैः अष्टसात्त्विकभावातिरिक्तः स्तन्यस्रावरूपनवमनूतनः सात्त्विकभावः समुद्भावितश्चेति वैशिष्ट्यन्यापेक्षया।

यद्यपि प्रीतिभक्तिरसे प्रोक्ता सर्वे सञ्चारिभावा रसेऽस्मिन् स्वीक्रियन्ते किन्तु अपस्मारसञ्चारिभावस्यात्र प्राधान्यं भवति। वियोगावस्थायां चिन्ताविषादनिर्वेदजडतादैन्यचपलोन्मादमोहादीनाम् आधिक्येन उद्रेकः भवति। अपि च वियोगे प्रीतिभक्तरसवदेव दशदशा भवन्ति।

पूर्ववर्णितप्रेयोरसापेक्षया अस्य रसस्य वैशिष्ट्यमस्ति, यतो हि तत्र मनोवैज्ञानिकदृष्ट्या प्रेयोरसस्य सिद्धौ विषयस्य प्रीतेः ज्ञानं नितान्तम् आवश्यकम्, यथा 'श्रीकृष्णस्य प्रीतिर्ममोपरि वर्तते इति ज्ञात्वैव सखा कृष्णं प्रत्याकृष्यते, ततः स्नेहो जायते, यतो हि तत्र सामान्यभावनाया एव प्राधान्यम्। भावनानुकूल्येनैव प्रेयोरसः तिष्ठति। विषये भावस्य प्रातिकूल्येऽभावे वा सख्यभावो न कथमपि पुष्यति। किन्तु रसेऽस्मिन् तज्ज्ञानस्य आवश्यकता नास्ति, यतो हि मातुर्हृदयं पुत्रकल्याणाय स्वाभाविकेनैव दयार्द्रं प्रेमासक्तं च भवति। श्रीकृष्णस्य अनुरागो मातरि यशोदायामस्ति न वेति ज्ञानस्य आवश्यकता नास्ति, यतो हि यशोदायाः स्नेहः पुत्रे श्रीकृष्णे अवश्यमेव वर्तते।'

भक्तिरसज्ञानां मते प्रीतिप्रेयोवात्सल्यादिरसत्रयी भक्तानां चेतसि मिश्रितामिश्रितरूपेण वानुभूयते। श्रीकृष्णस्य अपेक्षया ज्येष्ठेऽपि तेन सह क्रीडनात् वलदेवस्य सख्यं प्रीतिवात्सल्ययुक्तम्, युधिष्ठिरस्य वात्सल्यं प्रीतिसख्याभ्यां संयुक्तम्, आहुकादिभृत्यानां प्रीतिर्वात्सल्यता, नकुलसहदेवनारदादीनाञ्च सख्यं प्रीत्याकारालम्बितम्, शिवगरुडोद्धवादीनां प्रीतिश्च सख्येन मिश्रिता प्रतिपादिता सन्ति भक्तिशास्त्रेषु।

वात्सल्यभक्तिरसोऽयं रूपगोस्वामिमते नाट्यज्ञैः साहित्यिक्यैरपि स्वीकृतः। नारायणभट्टेनापि वात्सल्यभक्तिरसस्य आश्रयालम्बनस्य बहुविस्तारं प्रदर्श्य पर्यन्ते भक्तिरसामतृसिन्धुकारमतमेव अनुसृतम्। कविकर्णपुरमते वात्सल्यभक्तिरसस्य स्थायिभावस्तु 'ममकारः' इति वर्तते। वात्सल्यभक्तिरसस्य उदाहरणं यथा –

सुतमङ्गुलिभिः सुस्तनी चिबुकाग्रे दधती दयार्द्रधीः।
समलालयदालयात् पुनः स्थितिभाजं ब्रजराजगेहिनी।।

**उपसंहृतिः -**

भक्तिरसस्य व्याख्यानं उज्ज्वलनीलमणिग्रन्थे न केवलं व्याख्येतृवर्गैः कृतम्। यद्यपि विश्वविख्यातः कामशास्त्रकारः वात्सायनः, पाश्चात्यमनीषिणः फ्रयेड, ह्याभलक् एलिस, उइलियम स्टेकेल, मेरि कारमाइकेल स्टोपस च यू प्रभृतीनां मनीषिगणानां मनस्तत्त्वविषयके ग्रन्थे मानस्तात्विकविश्लेषणं अत्यन्तं स्थूलदृष्ट्या अकिञ्चित्करम् व्याख्यातम्। परन्तु पुज्यपादगोस्वामिना नीलमणौ मनःसमीक्षणविषये सूक्ष्मातिसूक्ष्मया मनसः निगूढरहस्यतत्त्वं सरलतया गाम्भीर्येण स्फुटीकृतम्। अतः साम्प्रतम् काले मनःविद्या अतीवा महत्तरा, यस्योपयोगिता इदानीन्तु समादृता च अनुशीलनीयाः।

**सहायकाः ग्रन्थाः –**


- श्रीचैतन्यचरितामृतम् (श्रीकृष्णदासकविराजप्रणीतम्), हरिदासशास्त्रिसम्पादितं प्रकाशितञ्च, वृन्दावन (मथुरा) : श्रीगदाधर गौरहरि प्रेस, श्रीहरिदासशास्त्री गोसेवा संस्थान, २००० ।
- श्रीब्रह्मसंहिता, श्रीमद्भक्तिवेदान्त सरस्वती गोस्वामी ठाकुरः, मुम्बइ (जुहु) : भक्तिवेदान्त-वुक-ट्रास्ट, २०१७ ।
- श्रीभगवद्भक्तिरसायनम् (श्रीमधुसूदनसरस्वतीप्रणीतम्), जनार्दनशास्त्रिपाण्डेयानुवादितम्, वाराणसी : चौखम्बा विद्याभवन, १९९८ ।
- श्रीभगवत्सन्दर्भः (श्रीजीवगोस्वामिप्रभुपादविरचितः), हरिदासशास्त्रिसम्पादितः, उत्तरप्रदेशः(मथुरा) : श्रीगदाधरगौरहरि प्रेस, श्रीहरिदास निवास, श्रीगौराङ्गाब्दः ४९८ ।



Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

- श्रीमद्वाल्मीकिरामायणम् (श्रीमद्गोविन्दराजीयव्याख्यानसमलंकृतम्), टी, आर, कृष्णाचार्येण टी,आर,व्यासाचार्येण च सम्पादितम्, बम्बे : निर्णयसागर प्रेस, १९११ ।
- श्रीमद्भगवद्गीता, श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीधराचार्यकृत- श्रीधरी (सुबोधिनी) व्याख्यासहिता,– रामचन्द्रझासम्पादिता, वाराणसी : चौखम्बा कृष्णदास अकादमी, २००७ ।
- श्रीमद्भागवतपुराणम् श्रीव्यासमहर्षिप्रोक्तम्, श्रीधरस्वमिविरचितया भावार्थबोधिनीनाम्न्या संस्कृतटीकया समुपेतम्, जगदीशलालशास्त्रिसम्पादितम्, दिल्ली : मोतिलाल वानारसी दास, १९८३ ।
- श्रीलघुभागवतामृतम् (श्रीश्रीमद्रूपगोस्वामिप्रभुपादविरचितम्), तात्पर्यबोधिनीटीकासम्बलितम्, व्रजविभूतिश्रीश्यामदाससम्पादितम्, प्रस्तुतिः – दासाभास गिरिराज, श्रीधाम वृन्दावन : अव्यवसायिक-संस्थानम् – श्रीहरिनाम संकीर्तन मण्डल, २००९ ।
- श्रीविष्णुपुराणम्, मूल श्लोकः तथा हिन्दी-अनुवादसहितः, गोरखपुरम् : गीताप्रेस, सं, २०७६ ।
- उज्ज्वलनीलमणिः (श्रीलरूपगोस्वामी), (श्रीलजीवगोस्वामिकृतया लोचनरोचनीनाम्न्या तथा श्रीलविश्वनाथचक्रवर्तिकृतया आनन्दचनद्रिकानाम्न्या टीकया च सहितः), श्रीमद्भक्तिवेदान्त-नारायण-गोस्वामि-महाराजेन अनुदितः सम्पादितश्च, गौडीय मठ : गौडीय वेदान्त प्रकाशन, २००६ ।
- उज्ज्वलनीलमणिः (श्रीलरूपगोस्वामी), काव्यमाला, ९५, जयपुरमहाराजाश्रितेन महामहोपाध्यायपण्डितश्रीदुर्गाप्रसादतनयपण्डितकेदारनाथेन, मुम्बापुरवासिपणशीकरोपाह्वलक्ष्मणशर्मात्मजवासुदेवशर्मणा च संशोधितः, मुम्बइ : निर्णयसागर शकाब्दः १८३५, ख्रिस्ताब्दः १९१४ ।
- उज्ज्वलनीलमणिः (श्रीलरूपगोस्वामी), (श्रीलजीवगोस्वामिकृतया लोचनरोचनीनाम्न्या तथा श्रीलविश्वनाथचक्रवर्तिकृतया आनन्दचनद्रिकानाम्न्या टीकया च सहितः), रामनारायणविद्यारत्नसम्पादितः, कलकाता : अक्षयलाइब्रेरी, १४१४ ।
- दानकेलिकौमुदी (श्रीलरूपगोस्वामी), (महती टीका सहिता), कृष्णदाससम्पादिता, मथुरा : सम्बत् २०२४ ।
- प्रीतिसन्दर्भः (श्रीलरूपगोस्वामी), हरिदासशास्त्रिसम्पादितः, मथुरा : श्रीगदाधरगौरहरिप्रेस, १९८६ ।
- भक्तिरसामृतसिन्धुः (श्रीलरूपगोस्वामी), श्रीमद्भक्तिरक्षक-श्रीधर-देवगोस्वामिना सम्पादितः, कलिकाता ५५ : श्रीचैतन्य-सारस्वत-कृष्णानुशीलन-सङ्घः, श्रीजन्माष्टमी तिथिः, तां १३९६ ।
- भक्तिरसायनम् (श्रीमन्मधुसूदन सरस्वती), दुर्गाचरण सांख्य-वेदान्ततीर्थ महोदयेन व्याख्यातम् अनुदितं सम्पादितं च, कलिकाता : बङ्गाब्दः १३४० ।
- ललितमाधवनाटकम् (श्रीलरूपगोस्वामी), वावुलालशुक्लसम्पादितम्, वाराणसी : चौखम्बा-संस्कृत-सीरिज-अफिसः, २०१० ।
- विदग्धमाधवम् (श्रीलरूपगोस्वामी), रमाकान्तझासम्पादितम्, वाराणसी : चौखम्बा-संस्कृत-सीरिज-अफिसः, १९७० ।



Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431

Volume – 2 | Issue – IV | Jul-Aug 2025 | ISSN: 3049-0278 (Online)

Amitrakshar International Journal
of Interdisciplinary and Transdisciplinary Research (AIJITR)
(A Social Science, Science and Indian Knowledge Systems Perspective)
Open-Access, Peer-Reviewed, Refereed, Bi-Monthly, International E-Journal

- शृङ्गारप्रकाशः (साहितयप्रकाशः), भोजराजः, (सम्पा,) –रेवाप्रसादद्विवेदीमहोदयेन सदाशिवकुमारद्विवेदीमहोदयेन च सम्पादितः, निउ दिल्ली : इन्दिरागान्धी न्याशनाल सेन्टार फर दा आर्ट्स, २००७ ।


Published by: Amitrakshar Publishers – Amitrakshar International Journal of Interdisciplinary and Transdisciplinary Research (AIJITR)
https://www.amitrakshar.co.in/journal/ : editor@amitrakshar.co.in DOI (Crossref) Prefix: 10.63431